# 2024

## SANSKRIT — GENERAL

**Paper : DSE-A-1 and DSE-A-2**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**Paper : DSE-A-1**

**(Philosophy, Religion and Culture in Sanskrit Tradition)**

**Full Marks : 65**

**Section – A**

**Unit – I**

**(Marks : 10)**

1\. अधोलिखितेषु यथामति ***पञ्चप्रश्नाः*** समाधेयाः (देवनागरलिप्या सुरगिरा च)। 2×5

(a) 'यतात्मा', 'दृढनिश्चयः' चेति शब्दद्वयस्य कोऽर्थः?

(b) 'तेषामहं समुद्धर्ता' इत्यत्र को वक्ता? 'तेषाम्' इत्यनेन के अवबुध्यन्ते?

(c) सर्वकर्मफलत्यागः केन उपायेन सम्भवः?

(d) 'अस्तेयम्' इत्यस्य कोऽर्थः?

(e) 'मे युक्ततमा मताः' – इति कुत्र उपलभ्यते? 'युक्ततमाः' के?

(f) 'अद्वेष्टा सर्वभूतानां ________ ________ एव च'-इत्यत्र शून्यस्थानं पूरयितव्यम्।

(g) 'श्रेयो हि ________ ________ ध्यानं विशिष्यते'-अत्र रिक्तस्थानं पूरयितव्यम्।

**Unit – III**

**(Marks : 10)**

2\. अधोलिखितयोः कस्य***चिदेकस्य*** उत्तरं लेखनीयम्। 10×1

(a) शाश्वतधर्ममतमनुसृत्य दैवप्रभावपुरुषकारयोः वैशिष्ट्यम् आलोच्यताम्।

(b) मानवानां जीवने अदृष्टफलस्य प्रभावः लेखनीयः।

**अथवा,**

3. निम्नलिखितेषु कस्यचन ***द्वितयस्य*** टीका कार्या। 5×2

(a) पुरुषकारः

(b) अदृष्टः

(c) दैवम् (भाग्यम्)

(d) क्रियमाणकर्म।

## Section – B

## Unit – II

**(Marks : 15)**

4. अधोलिखितेषु ***विषयत्रयम***धिकृत्य टीका लेखनीया (एतेषु ***द्वयोः*** उत्तरं देवनागरलिप्या सुरगिरा च लेखनीयम्)। 5×3

(a) आश्रमधर्मः

(b) सामान्यधर्मः

(c) पुरुषार्थचतुष्टयम्

(d) पितृगणाः

(e) कर्मविपाकः।

## Section – C

## Unit – I

**(Marks : 15)**

5. अधोलिखितेषु यथामति ***विषयत्रयम***धिकृत्य टीका कार्या (एतेषु ***कस्यैकस्य*** उत्तरं देवनागरलिप्या सुरगिरा च लेखनीयम्)। 5×3

(a) दानत्रयम्

(b) कर्मयोगः

(c) निष्कामकर्म

(d) ब्राह्मीस्थितिः

(e) श्रद्धा।

## Unit – II

**(Marks : 15)**

6. अधोलिखितेषु विषयत्रयमधिकृत्य टीका लेखनीया (एतेषु कस्यैकस्य उत्तरं देवनागरलिप्या सुरगिरा च लेखनीयम्)। 5×3

(a) गुणकर्मणोः सम्बन्धः

(b) परा प्रकृतिः

(c) व्यवसायिकात्मिका बुद्धिः

(d) तमोगुणस्य प्रभावः

(e) सत्त्वगुणस्य स्वरूपम्।

## Paper : DSE-A-2

## (Indian Perspectives in Personality Development)

**Full Marks : 65**

### Section – B

**(Marks : 30)**

1. अधोनिर्दिष्टेषु कस्य***चिदेकस्य*** उत्तरं ***संस्कृतभाषया देवनागरलिप्या*** च दातव्यम्।

   (a) का प्रकृतिः? कश्च पुरुषः? गीतोक्तदिशा प्रकृतिपुरुषयोः तात्पर्यं विचार्यताम्। 2+2+6

   (b) "दृष्ट्वेमान् स्वजनान् कृष्ण युयुत्सून्..."

   – अत्र वक्ता कः? वक्ता कान् स्वजनान् दृष्टवान्? तान् दृष्ट्वा वक्तुः कीदृशी अवस्था अभवत्? कथं वा तस्य तादृशी अवस्था अभवत्? 1+3+2+4

   (c) "नैनं पश्यन्त्यचेतसः"

   – अत्र "एनं" पदेन किं लक्ष्यते? "अचेतसः" पदेन के लक्ष्यन्ते? अचेतसः किमर्थम् एनं न पश्यन्ति? के पुनः एनं द्रष्टुं शक्नुवन्ति? 1+1+5+3

2. अधोलिखितेषु ***पञ्च*** प्रश्नाः ***संस्कृतभाषया देवनागरलिप्या*** च समाधेयाः। 2×5

   (a) श्रीमद्भगवद्गीता महाभारतस्य कस्मिन् पर्वणि वर्तते? अत्र कति अध्यायाः सन्ति?

   (b) कथं वर्णसङ्करः जायते?

   (c) कौरवाणां सेनापतेः नाम किम्? पाण्डवानाञ्च क आसीत् सेनापतिः?

   (d) "आचार्यमुपसङ्गम्य राजा वचनमब्रवीत्"– अत्र "आचार्य–" पदेन को बोधितः? कश्च राजा?

   (e) श्रीकृष्णनादितस्य **शङ्खस्य** नाम किम्? अर्जुननादितस्य च **शङ्खस्य** नाम किम्?

   (f) "तद्धाम परमं मम"– इति अत्र मम इत्यनेन कस्य बोधो जायते?

   (g) अक्षरः पुरुषः कः?

3. अधोलिखितेषु ***द्वयोः*** श्लोकयोः अनुवादः वङ्गभाषया आङ्गलभाषया वा कार्यः। 5×2

   (a) शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः।
   गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात्॥

   (b) श्रोत्रं चक्षुः स्पर्शनञ्च रसनं घ्राणमेव च।
   अधिष्ठाय मनश्चायं विषयानुपसेवते॥

   (c) इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते।
   एतद् यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः॥

## Section – C

**(Marks : 15)**

4. अधोलिखितेषु ***द्वयोः*** टीका कार्या। 4×2

आसुरी तपस्या, तामसः यज्ञः, रजोगुणः, सात्त्विकी श्रद्धा।

5. अधोलिखितेषु कस्य***चिदेकस्य*** प्रसङ्गनिर्देशपूर्वकं व्याख्या कार्या। 7×1

(a) यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः।
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः।।

(b) अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः।
दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः।।

(c) सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम्।।

## Section – D

**(Marks : 20)**

6. अधस्तनेषु ***द्वयोः*** प्रश्नयोः उत्तरं दातव्यम्।

(a) "न मे भक्तः प्रणश्यति"– कस्य भक्तः कथं न प्रणश्यति? 1+4

(b) 'योगक्षेमं वहाम्यहम्'– कस्योक्तिरियम्? उक्तेरस्याः किं तात्पर्यम्? 1+4

(c) गीतोक्तदिशा चतुर्वर्णानां स्वभावजं कर्म किमिति विचार्यताम्। 5

(d) "हरन्ति प्रसभं मनः"– कानि मनः हरन्ति? उक्तेरस्याः किं तात्पर्यम्? 2+3

7. अधस्तनेषु ***द्वयोः*** श्लोकयोः अनुवादः वङ्गभाषया आङ्गलभाषया वा कार्यः। 5×2

(a) श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्।
स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्विषम्।।

(b) न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते।
न च संन्यसनादेव सिद्धिं समधिगच्छति।।

(c) यदा सर्वे समारम्भाः कामसंकल्पवर्जिताः।
ज्ञानाग्निदग्धकर्माणां तामाहुः पण्डितं बुधाः।।

(d) यत्रोपरमते चित्तं निरुद्धं योगसेवया।
यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति।।

---